# स्वरमङ्गला

## त्रैमासिकी संस्कृत-शोध-पत्रिका

वर्षः - 40 | जनवरी-मार्च 2015 | अङ्कः - 1

## राजस्थान-संस्कृत-अकादमी

जे 15, अकादमी संकुल, झालाना सांस्थानिक क्षेत्रम्,
जयपुरम् (राजस्थानम्) दूरभाष : 0141-2709120
E-mail: rajasthansanskritacademy@gmail.com

रजि. संख्या RM 26065/72

ISSN-2249-9296

# स्वर-मङ्गला

**प्रकाशनम्**
जनवरी-मार्च, 2015

**प्रधानसम्पादकः**
शैलेन्द्रकुमार अग्रवालः

**प्रबन्धसम्पादकः**
डॉ. रेणुका राठौडः

**सम्पादकः**
आचार्यः (डॉ.) श्रीकृष्णशर्मा

विनोद शर्मा

वार्षिकमूल्यम् : शतम् रूप्यकाणि (100.00)
सैषा प्रतिः पञ्चविंशतिः रूप्यकाणि (25.00)
आजीवनमूल्यम् : सहस्रम् रूप्यकाणि (1000.00)

**सङ्गणकटङ्ककः** महेन्द्रकुमारशर्मा, जयपुरम्, दूरध्वनिः 98292 36667
**मुद्रक** : राजस्थान-राज्य-सहकारी-मुद्रणालयः लि., जयपुरम्।

# अनुक्रमणिका


| | | | |
|---|---|---|---|
| | सम्पादकीयम् | – प्रोफेसर श्रीकृष्णशर्मा | |
| 1. | वर्तमानसन्दर्भे महाभारतम् | – डॉ. मिताली देवः | 1 |
| 2. | व्याकरणमीमांसाशास्त्रयोर्विरोधो मतभेदो वा | – डॉ. कमलनयनशर्मा | 7 |
| 3. | काव्यरचनाप्रक्रियायां चित्तवृत्तीनां भूमिका | – प्रोफेसर रमाकान्तपाण्डेयः | 20 |
| 4. | वैदिकं सृष्टिविज्ञानम् | – डॉ. ब्रह्मचारी व्यासनन्दनः | 32 |
| 5. | प्राचीनाऽऽधुनिकशिक्षयोर्मध्ये तुलनात्मकध्ययनम् | – प्रोफ़ेसर विनोदकुमार झाः | 39 |
| 6. | काव्य-स्वरूपविमर्शः | – डॉ. कैलाशनाथद्विवेदी | 45 |
| 7. | महामहिम-राष्ट्रपतिसम्मानितस्य पं.विश्वनाथमिश्रस्य व्यक्तित्वं कृतित्वञ्च | – डॉ. दूलीचन्दशर्मा | 52 |
| 8. | महामहोपाध्याय-पण्डित-गोकुलनाथप्रणीतं शिवशतकं तत्पदार्थप्रकाशिका च | – डॉ. रत्नमोहनझाः | 64 |
| 9. | काव्यास्वादने सहृदयपरिकल्पनम् | – डॉ. रमा गुप्ता | 71 |
| 10. | कवयित्री स्वतन्त्रतासेनानिनी च पण्डिता क्षमारावः | – डॉ. दीपमाला | 76 |


विनोद कुमार

वर्ष : 40 अङ्क: 1
जनवरी–मार्च, 2015

स्वरमङ्गला
ISSN-2249-9296

# प्राचीनाऽऽधुनिकशिक्षयोर्मध्ये तुलनात्मकमध्ययनम्

– आचार्यः विनोदकुमारझाः

'शिक्षा' शब्दस्य व्युत्पत्तिः वर्तते–शिक्ष्यते अनया अथवा शिक्ष्यते या, सा 'शिक्षा'। गुरुमतः, हलादेः 'शिक्ष्' धातोः 'गुरोश्च हलः[1]' इति सूत्रेण कर्तृभिन्ने करणकारके, संज्ञाविषये 'अ' प्रत्यये 'अजाद्यतष्टाप्[2]' इत्यनेन टापि स्वादिकार्ये च कृते 'शिक्षा' शब्दस्य सिद्धिर्भवति। पुरुषार्थ–चतुष्टयस्य सिद्धौ शिक्षा अद्वितीयं साधनं विद्यते। निश्चितोद्देश्यस्य प्राप्त्यर्थ्यं यदा विद्यार्थी गुरोः शिक्षां गृह्णाति, तदा तस्य समक्षं लक्ष्यसिद्धिं विहाय काऽपि समस्या न भवति। अतः प्राचीनकालिकः विद्यार्थी निश्चित–दिशां प्रति वर्धमानोऽध्ययनं करोति स्म। 'अमृतं हि विद्या', 'विद्ययामृतमश्नुते' इति लक्ष्यस्य पूर्तये सः अध्ययनं करोति स्म।

प्राचीनकाले गुरुशिष्ययोः विवादो नाऽसीत्। साक्षात्कृत्धर्माणः ऋषयः स्वतपोबलेन वेदानां साक्षात्कारं कृत्वा ज्ञानप्राप्तिं कुर्वन्ति स्म[3]। ततः पश्चात् एते द्रष्टारः ऋषयः, तेभ्यः जनेभ्यः ज्ञानोपदेशं कृतवन्तः ये स्वयं प्रत्यक्षकरणे असमर्थाः आसन्[4]। धारणाशक्तेः ह्रासकारणात् तृतीयकोटेः जनाः यदा तेषाम् उपदेशानां यथावद्ग्रहणकरणे असमर्थाः अभवन् तदा वेद–वेदाङ्गानि ग्रन्थरूपे समाम्नातानि[5] तथा च तेषाम् अध्ययनाऽध्यापनस्य प्रक्रिया प्रारब्धा। परा तथा अपरा इति विभागद्वये विद्यायाः विभाजनं जातम्। धर्मार्थकामानां प्राप्तये अपराविद्या तथा मोक्षप्राप्तये पराविद्या साधनम् आसीत्। जिज्ञासवः शिष्याः स्व–इष्टसिद्धये गुरु–चरणानां शरणं गच्छन्ति स्म। गुरवः तेषाम् अज्ञानानां निवारणं कुर्वन्ति स्म[6]।

---

1. पाणिनीय–अष्टाध्यायी–सूत्रपाठः– (3/3/103)
2. पाणिनीय–अष्टाध्यायी–सूत्रपाठः– (4/1/4)
3. साक्षात्कृतधर्माण ऋषयो बभूव। (निरुक्ते प्रथमाध्याये)
4. ते अवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः। (निरुक्ते प्रथमाध्याये)
5. उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणाय इमं ग्रन्थं समाम्नासिषुः, वेदं च वेदाङ्गानि च। (निरुक्ते, प्रथमाध्याये)
6. गिरति अज्ञानम् (नाशयति अविद्याम्) इति गुरुः।

शिक्षायाः परमोद्देश्यम् आसीत्-आत्म-ज्ञानस्य उपलब्धिः। एतदर्थं शिष्याः सद्गुरोः आश्रयं गृह्णन्ति स्म[7]। शिष्यैः गुरुः ब्रह्मरूपेण, विष्णुरूपेण महेशरूपेण च मन्यते स्म[8]। शरणागतशिष्यस्य आभ्यन्तरे अध्यात्मज्ञानस्य सर्जनाय गुरुः ब्रह्मा, त्राणार्थं[9] ज्ञानविज्ञानसंरक्षार्थं च विष्णुः, सकलकलुषस्य संहरणार्थं विष्णुः तथा परमात्म-ज्ञानप्रदानेन परब्रह्म मन्यते स्म। 'गुरुम् अतिक्रम्य किमपि अन्यत् तत्त्वं नास्ति'[10] इति भावना शिष्याणां हृदये बद्धमूला आसीत्। गुरुः अज्ञान-तिमिरेण अन्धस्य शिष्यस्य प्रज्ञाचक्षुः ज्ञानरूपाञ्जनशलाकया उन्मीलितं करोति स्म, तस्मात् शिष्यः आजीवनं नतमस्तकः तिष्ठिति स्म[11]। शिष्येभ्यः गुरोः स्थानम् उच्चतमम् आसीत्।

उपर्युक्ताः चत्वारः पुरुषार्थाः अध्ययनस्य प्रयोजनानि आसन्, किन्तु व्यावहारिकदृष्ट्या अध्यापनस्य त्रीणि प्रयोजनानि आसन्-धर्मः,अर्थः शुश्रूषाप्राप्तिश्च[12]।

आचार्यः धर्मार्थं शिक्षां ददाति स्म। आचार्यः शिष्येषु आचारस्य अर्थात् चरित्रस्य निर्माणं करोति स्म। शास्त्राणां रहस्यानि उद्घाटयति स्म तथा च शिष्याणां बुद्धिविकासं करोति स्म[13]। शिष्याणाम् उपनयनसंस्कारानन्तरं तेभ्यः कल्पेन रहस्येन च सह वेदादीनां शिक्षां ददौ[14]। आचार्यस्य इयमेव कामना बभूव यत् तस्य शिष्याः विद्वांसो भूत्वा मनस्विनः यशस्विनश्च भवेयुः तथा शिष्यपरम्परां सुदृढां कुर्युः।

आंशिकरूपेण वेदस्य वेदाङ्गानां वा जीविकायै अध्यापनकर्तारः 'उपाध्यायाः' कथ्यन्ते स्म[15], अतः दश-उपाध्यायानाम् अपेक्षया एकः आचार्यः श्रेष्ठः मन्यते स्म[16]।

---

7. तद्विज्ञानार्थं स गुरुमेवाधिगच्छेत्। समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्।। (उपनिषदि)
   तस्माद् गुरुं प्रपद्येत ब्रह्मण्युपशमाश्रयम्।। (श्रीमद्भागवते)
   समाश्रयेत् सद्गुरुमात्मलब्धये। (अध्यात्मरामायणे)
8. गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः। गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः।।
9. शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन।
10. नास्ति तत्त्वं गुरोः परम्।
11. अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया। चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।
12. अध्यापनं च त्रिविधं धर्मार्थं चार्थकारणात्। शुश्रूषाकरणं चेति ऋषिभिः परिकीर्तितम्।। (हारीते)
13. आचार्यः आचारं ग्राहयति। आचिनोति अर्थान्, आचिनोति बुद्धिमिति वा।। (निरुक्ते)
14. आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि। स्वयमाचरते यस्मात् तस्मादाचार्य इष्यते।।
    उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।। (मनुस्मृतौ-2/140)
15. एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः। योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते।।(मनुस्मृतौ- 2/141)
16. उपाध्यायान् दशाचार्यं.............. (मनुस्मृतौ- 2/145)

प्राचीनकाले यस्मात् सत्शिक्षा मिलति स्म, तं गुरुं मत्त्वा तस्य सम्मानः क्रियते स्म[17]।

शिक्षार्थी स्वविशेषतानुसारं शिष्यः, छात्रः, विद्यार्थी, अन्तेवासी इत्यादिभिः नामभिः व्यवहृतः भवति स्म। शासनयोग्यः 'शिष्यः'[18] कथ्यते स्म। अनुशासनप्रियता अस्य धर्मविशेषः आसीत्। अध्ययनकाले पूर्णोऽनुशासितो भूत्वा सः सामाजिकजीवने सफलो भवति स्म।

'छात्रः' सः कथ्यते स्म यः केवलं स्वाध्यायरतो भूत्वा गुरुजनानां यत्किञ्चिद्दोषोपरि आवरणं कृत्वा तेषां यशसः विस्तारं करोति स्म[19]। तात्पर्यमिदमस्ति यद् अध्ययनकाले स्वस्य शंकायाः तात्कालिकसमाधाने अप्राप्तेऽपि सः समाधानाय धैर्यपूर्वकं समयस्य प्रतीक्षां करोति स्म। तत्कालमेव गुरोः अज्ञानदोषस्य प्रचारं न करोति स्म।

'विद्यार्थी'[20] आसीत् यः गुरुं विद्वांसं मत्वा विनम्रतापूर्वकं तं विद्यां याचते स्म। विद्यालाभः एव तस्य मुख्यं प्रयोजनं भवति स्म। विद्यां प्रति उत्कटानुरागः तथा गुरुं प्रति शुश्रूषाभावः विद्यार्थीशब्दस्य अर्थेनैव सूचितो भवति।

यः गुरोः समीपे स्थित्वा विद्याऽध्ययनं चकार, सः 'अन्तेवासी'[21] कथ्यते स्म। सः सदा शंकासमाधानावसरम् अव्यवधानपूर्वकं शुश्रूषावसरञ्च लेभे, तस्मादन्तेवासी अतिसौभाग्यशाली मन्यते स्म।

प्राचीन-भारतीयगुरुकुलेषु समस्तविद्यानाम् अध्ययनाऽध्यापनं गुरुशिष्याः सहैव स्थित्वा कुर्वन्ति स्म। तेषाम् आवासभोजनादीनां व्यवस्था गुरुकुले एव एकत्र भवति स्म। समाजस्य सर्ववर्गाणां जनाः सहैव पेठुः। सुदामाश्रीकृष्णयोः कृते पृथक्-पृथक् गुरुकुलं नासीत्। उभावपि एकस्मिन् आश्रमे पठतः स्म।

प्राचीनशिक्षापद्धतौ सच्चरित्राः सुसंस्कृताश्च शिक्षार्थिनः गुरुकुले प्रवेशस्य अधिकारिणः बभूवुः। तस्मिन् पवित्र- वातावरणे विद्याऽध्ययन-कर्तारः छात्राः विनयिनः बभूवुः। तान् एव दृष्ट्वा नीतिकारैः कथितमस्ति-विद्या ददाति विनयम्। शिक्षाग्रहणेन सहैव तेषु सद्गुणानाम् आधानं भवति स्म। ते सच्चरित्राः, संयमिनः, आचारवन्तः, सत्यपरायणाः, विनीताः, गुरुजनेषु श्रद्धालवः,

17. एकाक्षरप्रदातारं यो गुरुं नाभिमन्यते। षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः।।
18. शासितुं योग्यः शिष्यः। शास्+क्यप् (प्रत्ययः), पाणिनीय-अष्टाध्यायी-सूत्रपाठः (3/1/107)
19. गुरोर्दोषाणामावरणं छत्रम्, तच्छीलमस्य छात्रः। छत्रादिभ्यो णः (4/4/62)।
20. विद्याम् अर्थयते तच्छीलः विद्यार्थी। विद्या अर्थ+णिनि (प्रत्ययः), सुप्यजातौ णिनिस्ताच्छील्ये-(3/2/79)
21. अन्ते गुरुसमीपे वसति तच्छीलः, पूर्ववत् 'णिनिः' प्रत्ययः, शयवासवसिष्वकालात् (6/3/29) इति सूत्रेण सप्तम्याः अलुक्।

ब्रह्मचर्यपरायणाः तथा देशस्य समाजस्य च कृते उपयोगिनः नागरिकाः सिद्धाः भूत्वा गुरुकुलात् निर्गच्छन्ति स्म।

साधारणतः पञ्चमे वर्षे शिक्षार्थिनां गुरुकुले प्रवेशः भवति स्म। द्वादशवर्षपर्यन्तं तेषां निरन्तरम् अध्ययनं चचाल। अनन्तरं तेषां समावर्तनं बभूव। तदनन्तरं ते स्नातकाः कथ्यन्ते स्म। आचार्यद्वारा प्रतिदिनस्य परीक्षा एव तेषां परीक्षा भवति स्म। शास्त्रार्थे ते स्वयोग्यतायाः प्रमाणं ददिरे। सत्रान्ते तेषां दीक्षान्त-समारोहः बभूव। तत्र क्रियावान् कुलपतिः[22] स्नातकेभ्यः 'सत्यं वद धर्मं चर' इत्यादि-उपदेशान् ददाति स्म। अनन्तरं स्नातकाः यथासम्भवं गुरुदक्षिणां ददति स्म। एवम्प्रकारेण विद्याग्रहणाऽनन्तरं ते अधीतविद्यायाः स्वाध्यायं चक्रुः, व्यवहारे आनयन्ति स्म तथा च अन्ते प्रवचनं कुर्वन्ति स्म। इयं प्रक्रिया महर्षि-पतञ्जलिसमयं (ई. पू. 150) यावत् प्रचलिता आसीत्।

## आधुनिकी शिक्षा

गतशताब्द्याः अन्तिमे चरणे लार्ड मैकॉलेद्वारा सञ्चालिता शिक्षा आधुनिकी शिक्षा मन्यते। आधुनिकशिक्षायाः प्रारम्भिकावस्थायां तथा वर्तमानावस्थायामपि पर्याप्तपरिवर्तनं संजातमस्ति। युगानुकूलं मानवस्य समस्यायाः, आवश्यकतायाः तथा आकांक्षायाः अनुसारम् आयामः वर्धमानो वर्तते। विश्वस्य विकसितदेशेषु यैः वैज्ञानिक-आविष्कारैः, प्रचार-प्रसारैः आधिभौतिकसुखसमृद्धीनां श्रीवृद्धिः संजाता वर्तते तथा च इदानीमपि भूयमाना वर्तते, तासां प्रभावो भारतेऽपि अभवत् भूयमानश्च वर्तते। तस्माद् अत्रापि वैज्ञानिकीं तकनीकीं च शिक्षां प्रति अधिकं ध्यानं दीयते।

अद्यतनीम् अत्रत्यां शिक्षां सामान्यरूपेण त्रिषु विभक्तां कर्तुं शक्यते-1.चिकित्सा, आभियान्त्रिकी कम्प्यूटरादिकी च शिक्षा 2. सामान्य-विज्ञानस्य, कलायाः (आर्ट्स) वाणिज्यादीनां च शिक्षा 3. वेदवेदाङ्गादिविषयाणां संस्कृत-शिक्षा।

अत्र प्रथमकोटेः शिक्षा आधिभौतिकाऽभ्युदयसम्पादनार्थं अद्वितीयं साधनमस्ति, अतः अद्य देशस्य प्रथमकोटेः मेधाविन्यः छात्र-छात्राः इमां शिक्षां प्राप्तुं प्रयत्नशीलाः तिष्ठन्ति, किन्तु एतासां संख्या अल्पीयसी वर्तते। द्वितीयकोटेः शिक्षा अद्य दिशाहीना इव वर्तते। अत्र सामान्यस्तरस्य शिक्षार्थिनः आगच्छन्ति। अत्र शिक्षार्थिनां भूयसी संख्या वर्तते, अतः एतेषां समस्या अपि भयङ्करी विद्यते। तृतीयकोटेः शिक्षाऽस्ति संस्कृतस्य शिक्षा या प्राचीनकाले सर्वोच्चशिक्षा आसीत्, सर्वकारे समाजे च उपेक्षाकारणात् अद्य अधोगतौ अस्ति। शिक्षा सामान्या भवेद् या विशेषा, किन्तु तस्याः निश्चितोद्देश्यं भवेत्। उद्देश्यविहीना शिक्षा श्रेयस्करी न भवति।

विनोद २०

22. छात्राणां दशसाहस्रं योऽन्नपानादिना भरन्। अध्यापयति विप्रर्षिरसौ **कुलपतिः** स्मृतः।।

शिक्षायाः उद्देश्यं संक्षेपेण वर्तते-शिक्षार्थिनः पूर्णमानवाः भवेयुरिति। पूर्णमानवतायाः अर्थो वर्तते-मानवे आधिभौतिकस्य आध्यात्मिकतावादस्य च पूर्णसमन्वयः, सामञ्जस्यं सन्तुलनञ्च। आध्यात्मिकतायाः अभावेन असन्तुलनेन च मानवः दानवो भवति तथा समाजस्य कृते आतंकप्रदो भवति, येन सामाजिकी व्यवस्था अस्तव्यस्ता जायते। शिक्षया निम्नलिखितगुणानाम् अपेक्षा क्रियते। 1. मानवजीवनस्य महत्त्वस्य आदर्शस्य च ज्ञानं 2. चरित्रशिक्षणं 3. ज्ञानाऽर्जनस्य शक्तिः 4. समुचितजीविकोपार्जनस्य कृते कौशलम् 5. सत्याऽसत्यस्य परिज्ञानम् 6. समाज-परम्परा-मान्यतानां परिज्ञानम्।

शिक्षायाः प्रत्येकस्मिन् क्षेत्रे शिक्षार्थिनां कृते उपर्युक्तोद्देश्यानां पूर्तिरावश्यकी वर्तते। स्पष्टमस्ति यत् वर्तमानशिक्षया उद्देश्यस्य आंशिकी एव पूर्तिर्भवति। देशस्य स्वतन्त्रतायाः सप्तषष्टिवर्षानन्तरमपि शिक्षादृष्ट्या शिक्षायामापेक्षितः सुधारो न सञ्जातोऽस्ति।

इदानीं प्राथमिक्यां, माध्यमिक्यां उच्चशिक्षायां च शिक्षाम् विभक्तां कृत्वा तदनुसारिणी व्यंवस्था क्रियते। यद्यपि प्राथमिकी शिक्षा समेषां कृते अनिवार्या अस्ति तथापि प्राथमिकशिक्षाप्राप्तजनानां प्रतिशतं संख्या विभिन्नराज्येषु विभिन्ना विद्यते।

माध्यमिकी शिक्षा या शिक्षायाः 'रीढ' (कशेरुका) इति मन्यते, सुनिश्चिततां न प्राप्तवती अस्ति। स्वतन्त्रताऽनन्तरं अस्याः उपरि नैके निरर्थकाः प्रयोगाः कृताः वर्तन्ते। पूर्वस्वातन्त्र्यकाले 11+2+2+2 एवम्प्रकारकं सप्तदशवर्षीयः निश्चितपाठ्यक्रमः आसीत्। अनन्तरं 12+1+2+2=17 तथा 11+1+1+2+2 = 17 सप्तदशवर्षीयः पाठ्यक्रमः निर्मितः। इदानीम् 10+2+3+2 पाठ्यक्रमः चाल्यते। एभिः परिवर्तनैः न कश्चन चमत्कारः सञ्जातोऽस्ति। परिवर्तनं केवलं परिवर्तनाय अभवत्।

माध्यमिकस्तरे शिक्षामाध्यमस्य निश्चितस्वरूपम् इदानीं यावत् न सञ्जातमस्ति। द्विभाषा, त्रिभाषा, चतुर्भाषा चेतिसूत्राणां भाष्यं निश्चितं न सञ्जातमस्ति। राष्ट्रस्य एकतायाः, अखण्डतायाः अद्वितीयं साधनं संस्कृत-भाषा एकं द्वे वा राज्ये विहाय सर्वत्र उपेक्षिताऽस्ति। स्वतन्त्रतापूर्वं वैदेशिकशासनकाले संस्कृतम् अनिवार्यमासीत्। संस्कृतस्य विशेषतायाः गुणगानं प्रत्येकं जनः करोति, किन्तु व्यवहारे विपरीतनिर्णयं गृह्णाति।

नवीनशिक्षानीतेः बहुमहत्त्वं गीयते। अस्मिन् सम्बन्धे सर्वकारस्य प्रकाशित-पत्राणाम् आमुखे जीवनस्य आदर्शस्य महत्त्वस्य च चर्चा कृता वर्तते। अध्यात्मस्य मानवमूल्यस्य च कथा विद्यते, परं तेषाम् उपलब्धेः उपयानां सम्यग् निर्देशः नास्ति। अत्रापि संस्कृतस्य उपेक्षा दृश्यते।

यथा उपरि उक्तमस्ति यत् प्राचीनकाले शिक्षायाः उद्देश्यम् आत्मज्ञानस्य उपलब्धिः आसीत्,

किन्तु इदानीम् शिक्षायाः उद्देश्यम् अर्थोपार्जनं वर्तते, येन सुखसौविध्यपूर्ण जीवनयापनं भवेत्। साम्प्रतं जनानाम् ईश्वरे विश्वासो वर्तते, परं तथा नास्ति यथापूर्वम् आसीत्। एतादृशी एव स्थितिः गुरुं प्रति अपि अस्ति। समयानुसारं सर्वत्र क्षेत्रे वैभिन्न्यं समागतमस्ति। समयानुसारं जनैः कार्यमपि करणीयम्। अन्यथा यथासमयं यथेष्टं विकासो भवितुं न शक्नोति। समयानुसारं स्व-स्वस्थाने प्राचीना शिक्षा आधुनिकी च शिक्षा समीचीना वतते।

जनसंख्यावृद्धिम् अभिलक्ष्य यथा मम अनुभूतिः वर्तते तदनुसारम् आधुनिकीं शिक्षां गृहीत्वा जनाः अधिकम् आजीविकायाः साधनं गौरवमयञ्च जीवनं प्राप्नुवन्ति। शिक्षायाः उद्देश्यम् अर्थोपार्जनं भवेत्, समयानुसारम् इदं समीचीनं वर्तते, किन्तु शिक्षायाः यत् मुख्यम् उद्देश्यं वर्तते, तद् आधुनिकशिक्षया न प्राप्यते। तस्य प्राप्तिस्तु प्राचीन-शिक्षया अर्थात् संस्कृतशिक्षया एव भवितुं शक्नोति। यद्यपि वर्तमानसामाजिकपरिवेशे प्राचीनशिक्षाप्रणाली भवितुं न शक्नोति, किन्तु शिक्षायाः उद्देश्यस्य पूर्तये शिक्षाम् अनुकूलां कर्तुं शक्यते। अतः माध्यमिकस्तरे प्रत्येकं शिक्षार्थिनः कृते संस्कृतस्य ज्ञानम् अनिवार्यं भवेत्, एतदर्थं त्रिभाषा-सूत्रे संस्कृतस्य अनिवार्यता भवेत् तथा च गुरुशिष्ययोर्मध्ये अध्ययनाऽध्यापनस्य प्रवृत्तेः सर्वत्र विकासो भवेत्।

*व्याकरणविभागः*
*श्रीसोमनाथ-संस्कृत युनिवर्सिटी,*
*राजेन्द्र भुवन रोड, वेरावल,*
*जिला-गीर सोमनाथ, गुजरात।*
*पिन नं-362266*

विनोद झा